# ब्रिलिएंट पब्लिक स्कूल

**सीपत रोड, बहतराई, बिलासपुर (छ.ग.)**

**वार्षिक परीक्षा, - 2017-18**

**कक्षा - अष्टमः**

**विषयः - संस्कृतम्**

समय–2:30 होरा | अंक–80

दिनांक–12.03.2018 | दिन–सोमवासरः

---

(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति (अ), (ब), (स), (द)। चतुर्णां खण्डानां प्रश्नानाम् उत्तराणि लेखनम् अनिवार्यम् अस्ति।

(2) यथासम्भवं प्रत्येक खण्डानाम् उत्तराणि क्रमशः प्रदातव्यम्। अशुद्धिषु अंक कर्तनम् भविष्यति।

---

## खण्ड – (अ) अपठितांश अवबोधनम्

**प्र.1** वर्तमान युगम् विज्ञान मयम्। अस्माकं सर्वासुक्रियासु विज्ञान तत्वानि एव विराजन्ते। पठनक्रियाम् एव पश्यन्तु। पठने अपि विज्ञानस्य सिद्धान्ताः अनुकरणीयाः। यदि नेत्र व्यायामः न करिष्यामः तर्हि नेत्रयोः विकारः भवितुम् शक्नोति। यदा पुस्तकम् अतिदूरं भवति तदा अपि पठनं दुष्करं भवति। नेत्रविशेषज्ञाः कथयन्ति यत् प्रायः पंचविंशति सेष्टिमीटर मितं (25से.मी.) दूरम् अन्तरं समीचीनम् भवति। तावत् दूरं पुस्तकं गृहीत्वा पठने यदि बाधान अस्ति तदा शोभनम् परन्तु यदि न पठ्यते तदा नेत्रचिकित्सकस्य समीपे गत्वा नेत्र परीक्षणं कारयेत् अन्यथा नेत्र दृष्टिः दुर्बला भवेत्। अपि च शयानः अपि न पठेत्। प्रतिदिनं च सूर्योदये नेत्रव्यायामः करणीयः येन वृद्धावस्थायाम् अपि उपनेत्रस्य आवश्यकता न भवेत्।

**(क) कोष्ठकात् पदं चित्वा एकपदेन उत्तरत –** 2

(i) वर्तमानयुगं कीदृशम् अस्ति? (ज्ञानमयम् / विज्ञानमयम्)

(ii) नेत्रव्यायामः प्रतिदिनं कदाकरणीयः? (सूर्योदये / सायंकाले)

(iii) पठने पुस्तकं नेत्राभ्याम् (25 से.मी.) दूरं भवेत् इति के कथयन्ति? (सर्वे / नेत्रविशेषज्ञाः)

(iv) पठने कस्य सिद्धान्ताः अनुकरणीयाः (नेत्रस्य / विज्ञानस्य)

**(ख) पूर्ण वाक्येन उत्तरत –** 4

(i) यदा पुस्तकम् अतिदूरंभवतितदा किं भवति?

(ii) कति दूरात् पुस्तकम् पठनीयम्?

**(ग) यथानिर्देशम् उत्तरत –** 2

(i) 'कठिनम्' इति अर्थाय किं पदं अत्र प्रयुक्तम्?

(ii) 'अति समीपम्' इत्यस्य किं विपर्यय पदं अत्र प्रयुक्तम्?

**(घ) अनुच्छेदस्य समुचितं शीर्षकम् लिखत –** 2

## खण्ड – (ब) रचनात्मक कार्यम्

**प्र.2 स्वविद्यालये आयोजिते रक्तदानशिविरे रक्तदानविषये स्व पितरम् प्रति पत्रम् पूरयत –** 5

मानवस्थली छात्रावासः

पूज्य पितृमहोदयः

वीरेन्द्रग्रामः

चरणवन्दना

तिथिः ........................

अत्र कुशलंतत्रास्तु। अद्य अहं भवन्तं निवेदयामि यत् अस्माकं विद्यालये ह्यः रक्तदानशिविरं (1) ..................। अस्माकं निदेशक महोदयः अत्र मुख्यातिथिः (2) ..................। सर्वप्रथमम् सः एवं रक्तदानम् (3) ..................। तदा एकैकम् कृत्वा सर्वे (4) .................. रक्तदानम् अकुर्वन्। (5) .................. छात्राः अपि एतस्मिन् (6) ..................

Brilliant public school, Bilaspur
SAMPLE PAPERS

अग्रे आसन्। मम (7) .................... अपि रक्तदानस्य भावना (8) .................... अभवत्। अहं स्व मित्रेण सह (9) ........... अयच्छम्। आशासे यत् भवान् मम भवनां (10) .................. प्रसन्नः भविष्यति।

भवदीयः पुत्रः – अनुपः

**मंजूषा** – (उत्पन्ना, ज्ञात्वा, मनसि, शुभकार्ये, आसीत्, अकरोत्, अध्यापकाः, सर्वे, आयोजितम्, स्वरक्तम्)

**प्र.3 अधोलिखितम् संवादं मंजूषायां प्रदत्त शब्दैः पूरयन्तु –** **5**

दिनेशः – सुप्रभातम्, अधुना त्वं (1) ....................... करोषि?

संजयः – मया स्व (2) ....................... स्मर्यते।

दिनेशः – अद्य तु अवकाशः अस्ति किं भ्रमणाय न (3) .......................?

संजयः – श्वः मम संस्कृतस्य कक्षा परीक्षा अस्ति (4) ....................... पाठः स्मर्यते।

दिनेशः – किं त्वम् ईश्वरस्य (5) ....................... अपि करोषि?

संजयः – आम्र मया ईश्वरस्य भजनम् नित्यं क्रियते।

**मंजूषा** – (पाठः, किम्, मया, भजनम्, गच्छसि)

**प्र.4 निम्न चित्रस्य वर्णनम् मंजूषा प्रदत्त शब्दानाम् सहायतया पंच वाक्येषु लिखत –** **10**



द्विचक्रिका, त्रिचक्रिका, बसयानानि, कारचालकाः, विवादम्, जनाः, बसचालकः, उत्कोचम्।

## खण्ड – (स) अनुप्रयुक्त व्याकरणम्

**प्र.5 सन्धिः सन्धिच्छेदं वा कोष्ठकात् उचितम् पदम् चित्वा लिखत –** **2.5**

(क) हिमालयः भारतस्य उत्तरस्याम् स्थितः अस्ति। (हिमा + लयः / हिम + आलयः)

(ख) मातृ + आज्ञाम् मत्वा रामः सुखी अभवत्। (मात्राज्ञाम् / मातृज्ञाम्)

(ग) नगरे जनाः महोत्सवे नृत्यन्ति। (महो + उत्सवे / महा + उत्सवे)

(घ) विद्या + अर्थिनः ध्यानेन पठन्ति। (वद्यार्थीनः / विद्यार्थिनः)

(ङ) अहम् अपि वधू + उत्सवे गास्यामि। (वधूत्सवे / वध्वुत्सवे)

**प्र.6 समासं विग्रहंवा कोष्ठकात् उचितं पदं चित्वा लिखत –** **2.5**

(क) एषः विशालः ग्रन्थालयः मम अस्ति। (ग्रन्थे आलयः / ग्रन्थानाम् आलयः)

(ख) श्वेतम् अम्बरम् यस्य सः आगच्छत्। (श्वेताम्बरः विष्णुः / श्वेताम्बरम्)

(ग) पीतं दुग्धं येन सः खेलति। (पीतदुग्धम् / पीतदुग्धः)

(घ) निर्भयः बालः सिंहेन सह क्रीडति। (निर्गतः भयः यस्मात् सः / निर्गतम् भयम् यस्मात् सः)

(ङ) यथाशक्ति परिश्रमं कुरू। (शक्तिम् अनतिक्रम्य / शक्तिम् अतिक्रम्य)

**प्र.7 प्रकृति प्रत्यायोः विग्रहं कोष्ठकात् उचितं विकल्पं चित्वा लिखत –** **2.5**

(क) दुग्धं पीत्वा क्रीडनाय गच्छ। (पी + क्त्वा / पा + क्त्वा)

(ख) निर्धनाः कष्टं सहमानाः जीवनं यापयन्ति। (सह् + शानच् / सह् + मतुप्)

(ग) सः श्रेष्ठी दयावान् अस्ति। (दया + मतुप् / दय् + मतुप्)



Brilliant public School, Bilaspur
SAMPLE PAPERS

(घ) पतितस्य सहायताम् कुरू। (सह + तल् / सहाय + तल्)

(ङ) अस्माभिः दर्पः त्यक्तव्यः। (त्यज् + तव्यत् / त्यक् + तव्यत्)

**प्र.8 मंजूषा प्रदत्त अव्यय पदैः सहायतया रिक्त स्थानानि पूरयत –** 2.5

**मंजूषा –** (वृथा, यावत्, तावत्, सहसा, पुरा)

(1) .................... एकः नरेशः अभवत्।
विद्यां विना जीवनं (2) ......................।
(3) ....................... जीवनम् अस्ति (4) ....................... धर्मंचर।
(5) ....................... तस्य शिरसि एकं फलं अपतत्।

**प्र.9 कोष्ठकात् प्रदत्त उचितपदम् चित्वा लिखत –** 2.5

(क) बालः चन्द्रमसम् ....................... । (पश्यन्ति / पश्यति)

(ख) ....................... माता सेव्यते। (पुत्रः / पुत्रेण)

(ग) छात्रैः पाठाः ....................... । (पठ्यन्ते / पठ्यते)

(घ) भवता कौ .......................। (पश्यतः / दृश्येते)

(ङ) ....................... दुष्टः जीयते। (सैनिकेन / सैनिकैः)

**प्र.10 समय संख्यां दृष्ट्वा कोष्ठकात् शुद्धं उत्तरं चित्वा लिखत –** 2.5

(क) गोपः 4:00 ....................... उत्तिष्ठति। (चतुर्वादने / द्वादशवादने)

(ख) सः गोम्यः 4:30 .......................घासम् यच्छति। (सपादत्रिवादने / सार्धचतुर्वादने)

(ग) सः 4:45 ....................... गाम दोग्धि। (पादोनपंचवादने / सपादपंचवादने)

(घ) सः 6:15 ....................... दुग्धं वितरति। (पादोनषड्वादने / सपादषड्वादने)

(ङ) सः 9:15 ....................... स्वपिति। (पादोननववादने / सपादनववादने)

**प्र.11 चित्रं दृष्ट्वा गणयित्वा कोष्ठकात् उचितं पदं चित्वा लिखत।** 2.5

(क)  1. ....................छात्राः। (त्रयः/तिस्रः)

(ख)  2. ....................घटिका। (एकः/एका)

(ग)  3. ....................कूपौ। (द्वौ/द्वे)

(घ)  4. ....................पुष्करः। (एकः/एकम्)

(ङ)  5. ....................वृक्षाः। (चत्वारः/चत्वारि)

**प्र.12 कोष्ठकात् उचितम् पदम् चित्वा लिखत –** 2.5

(क) उन्नतान् ............................. पश्य। (पर्वतम् / पर्वतान्)

(ख) बालिका पितरम् .............................। (नंस्यति / नमिष्यति)

(ग) ............................. अवकाशः आसीत्। (श्वः / ह्यः)

(घ) ............................. मीना तरति। (एषा / एतत्)

(ङ) ............................. यजतः। (मुनयः / मुनी)

**खण्ड – (द) पठित अवबोधनम्**

**प्र.13 उपयुक्त कथनानां समक्षं आम् अथवा न इति लिखत –** 5

(क) सिंहः करिणां कुलं हन्ति।

(ख) कातरो युद्धे युद्धते।

(ग) कस्तूरी मृगात् जायते।

Brilliant public school, Bilaspur
SAMPLE PAPERS

(घ) कंसः जघान कृष्णम्।
(ङ) जयन्तः कृष्णस्य पुत्रः।

**प्र.14 अधोलिखितानि पदानि आधृत्य वाक्यानि रचयता – 5**

(क) साम्प्रतम् – ........................................ (ख) उपविष्टः – ........................................

(ग) निकषा – ........................................ (घ) कर्मभूमिः – ........................................

(ङ) परितः – ........................................

**प्र.15 रेखांकित पदेभ्यः प्रश्ननिर्माणं कृत्वा लिखत – 5**

(क) हिमालयः उत्तरस्याम् दिशि वर्तते।

(ख) पृथिव्याः मानदण्डः हिमालयः अस्ति।

(ग) कुमारसम्भव महाकाव्ये कालिदासेन विरचितम्।

(घ) अस्मिन् पाठे कविः हिमालयस्य वर्णनं करोति।

(ङ) तेषां स्वामिनः असमर्थाः सन्ति।

**प्र.16 अधोलिखितानां पदानां विलोमपदानि लिखत – 5**

(क) उपरि – ........................................।

(ख) आदानम् – ........................................।

(ग) परकीयम् – ........................................।

(घ) विषमता – ........................................।

(ङ) व्यक्तिगतम् – ........................................।

**प्र.17 एक पदेन उत्तरतं – 2**

(क) आर्यभटस्य वेधशाला कुत्र आसीत्?

(ख) इन्दोः किरणेषु कः निमज्जति?

(ग) अस्माकं प्रयासः कस्य रक्षणे अपेक्षितः?

(घ) अस्माकं देशे कति राज्यानि सन्ति?

**प्र.18 प्रश्नानां उत्तराणि पूर्णवाक्येन लिखत – 4**

(क) चेनम्मायाः सविधे कानि वस्तूनि आसन्?

(ख) पूर्वं प्रायः केन पदार्थेन निर्मितानि वस्तूनि प्राप्यन्ते स्म?

(ग) सावित्र्याः मृत्युः कथम् अभवत्?

(घ) महाराष्ट्रस्य प्रथामामहिला शिक्षिका का आसीत्?

**प्र.19 अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं वचनं च लिखत – 4**

| | पदानि | विभक्ति | वचनम् |
|---|---|---|---|
| (क) | भ्रमणाय | .............................. | .............................. |
| (ख) | वस्तूनि | .............................. | .............................. |
| (ग) | प्लास्टिकेन | .............................. | .............................. |
| (घ) | विकीर्णानि | .............................. | .............................. |
| (ङ) | मसियष्ट्या | .............................. | .............................. |
| (च) | स्यूतकेषु | .............................. | .............................. |
| (छ) | काष्ठपीठे | .............................. | .............................. |
| (ज) | पृथिव्याम् | .............................. | .............................. |

= = = 0 0 0 = = =

Brilliant Public School, Bilaspur
SAMPLE PAPERS